श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री किङ्गृहेश स्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to **Dr. Parthasarathy Desikan** of Bangalore for proofreading this document and suggesting changes to improve the presentation.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री किङ्गृहेश स्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अयत्न सङ्कल्पित सर्वलोकं सर्गापवर्गस्थिति संविधानम्।
अनादिमध्यान्तमशेषनाथं किङ्गेहनाथं शरणं भजामि॥ १ ॥

अकृत्रिमानां वचसामभूमिं अगोचरं ब्रह्मशिवादिवाचाम्।
अहं स्तुवे किङ्गृहनायक त्वां तथाप्यलज्जांस्तु मितं पचोक्तिः॥ २ ॥

अकिञ्चनोऽनन्यगतिस्त्वदीय स्तुतिं करोमीति मतिं करोमि।
कृपानिधे किङ्गृहनायकाद्य त्वमेव मे वाचमुदीरयेथाः॥ ३ ॥

त्वयैव दत्तामुपलभ्य वाणीं अणीयसीमप्यतुलप्रभावाम्।
प्रसादये किङ्गृहनायक त्वां न चेत् कुतो मे सफलं वचस्स्यात्॥ ४ ॥

अनेन जीवेन समस्तवस्तुं प्रविश्य नामानि च रूपभेदैः।
व्याकृत्य वीक्षावनमध्य भागे विभुं शयानं सततं भजामि॥ ५ ॥

अशेष पुंसां हृदि सन्निविष्टं अनल्पशक्त्यादि गुणैर्विशिष्टम्।
हृत्ताप हृत्पङ्कज भृङ्गजुष्टं देवं भजे किङ्गृहगं ममेष्टम्॥ ६ ॥

श्री शालिहोत्रार्पित शालिपिष्ट हृष्टो भवान् देव शयिष्णुरेनम्।
किं गेहमत्रेति यदावदत् तत् किङ्गेहमासीत् तव सद्म नाम्ना॥ ७ ॥

पद्मा महीलालित पाद पद्मम् पद्मासनाधिष्ठित निम्ननाभिम्।
शयानमाक्रम्य भुजङ्गतल्पं किङ्गेहसद्मानमहं नतोऽस्मि॥ ८ ॥

विस्मेरमासीत् भुवनं त्वदीयं चरित्र मन्वीक्ष्य चिरप्रवृत्तम्।
किङ्गेह नाथासुरकैटभादि निबर्हणार्थं किल सर्वशक्ते॥ ९ ॥

गङ्गादि तीर्थानि निषेव्य शंभुः सर्वाणि पुण्यायतनानि गत्वा।
अमुक्त पूर्वो विधिहत्यया त्वां किंसेव्य किङ्गेहपदे विमुक्तः॥ १० ॥

अजह्नुजानोद्य महापराधं द्विजं हि हृत्तापहरं सरस्ते।
अतीतरत् कौशिकमद्भुतं त्वत् प्रभावतः किङ्गृह नाथ नैतत्॥ ११ ॥

रघुप्रवीरस्य तवार्हमेतत् यथागतस्यैव सिपोर्जिघांसोः।
विधूय रक्षस्त्वं अमुष्य दिव्यं अदाः पदं किङ्गृह नायक त्वम्॥ १२ ॥

पिष्टप्रदीपान् परिकल्प्य ये त्वां हृष्टा भजन्तेऽहनि पुष्यदर्शे।
इष्टप्रदायी वितनोषि तेषां कष्टोपभोग्यान्यपि काङ्क्षितानि॥ १३ ॥

विकासयन् मानसपङ्कजानि विपश्चितां निश्चल भक्ति भाजाम्।
प्रादुर्भवन्नासुरकैटभादि तमोरवे त्वं मयि सुप्रसीद॥ १४ ॥

प्रद्युम्न नाम्ने तपसां हि धाम्ने कृपाप्रसन्ने त्वयि किङ्गृहेश।
गङ्गाधिकत्वं न किमाप तीर्थं हृत्तापहं वा तनयं न वन्ध्या॥ १५ ॥

त्वं सर्ववित् त्वं कमला सहायः त्वमेव वेदान्त वचोऽवसेयः।
भवन्तमेतं शरणं प्रपन्नाः वयं न यस्मात् परमस्ति दैवम्॥ १६ ॥

पुराणपुंभावमहो विगृह्य युवत्वमेवाकलयन् सुरूपम्।
उपायमस्त्वं किल धर्मसेन सुतां नताङ्गीमिह किङ्गृहेश॥ १७ ॥

श्री भूमिलालितपदं श्रितशेषतल्पं कल्पान्तयोग्य भुवनावन योगनिद्रम्।
श्री शालिहोत्र शिरसा धृतहस्त पद्मं श्री वीरराघव विभुं श्रयतां मनो मे॥ १८ ॥

वेङ्कटेश कविना विनिर्मितां किङ्गृहाधिपति संस्तुतिं पठन्।
दिव्यभोगमुपभुज्य मानवो भव्यरूपमवलोकयेत् प्रभोः॥ १९ ॥

॥ इति श्री किङ्गृहेश स्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥